# संस्कृत-वार्ता:

दिनाङ्क : 19/11/2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य तमिलनाडु-राज्यस्य कोयम्बत्तूर-नगरे पी. एम-किसान-योजनायाः एकविंशतितमं देय मूल्यानि लोकार्पितवान्।
- प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् सर्वकारेण सामाजिकसुरक्षाव्यवस्था अधुना प्रायः शतकोटिजनानां कृते विस्तृता। आन्ध्रप्रदेशस्य पुट्टपर्थी-नगरे भगवतः श्री सत्यसाईं बाबा-वर्यस्य शतवार्षिक- जन्मोत्सवे भागं भजितवान्।
- जनतादल (यूनाईटेड) दलस्य नेता नितीशकुमारः श्वः बिहारस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं करिष्यति।
- न्यायाधीशाः सेवानिवृत्ताः कर्मचारिणः च मिलित्वा प्रख्यात-नागरिकैः सह काङ्ग्रेस्-दलस्य, लोकसभायां विपक्षस्य नेतारं राहुलगान्धिनं निन्दयन्तः, भारतस्य निर्वाचन-आयोगादीनां संवैधानिक-संस्थानां निन्दायाः कृतप्रयासानां कृते, मुक्तपत्रम् लिखितवन्तः।

-----------------------------------------

<u>प्रधानमन्त्री- कोयम्बत्तूर</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य तमिलनाडु-राज्यस्य कोयम्बत्तूर-नगरे पी. एम-किसान-योजनायाः एकविंशतितमं देय मूल्यानि लोकार्पितवान्। सम्पूर्णे देशे नवकोटि-कृषकान् समर्थनाय प्रायः अष्टादशसहस्रकोटिरूप्यकाणि प्रदत्तानि। प्रधानमन्त्री अद्य कोयम्बत्तूर्-नगरे दक्षिण-भारत-प्राकृतिक-कृषि-शिखरसम्मेलने भागं भजितवान्। अस्मिन् अवसरे श्रीमोदी अवदत् यत्, विगतैकादश-वर्षेषु कृषिक्षेत्रे परिवर्तनात्मकानि परिष्काराणि दृष्टानि सन्ति। सः अवदत् यत्, देशः प्राकृतिककृषे वैश्विककेन्द्रं भवति तथा च तस्य जैवविविधता नूतनं स्वरूपं गृह्णाति। सः अवदत् यत्, कृषि-निर्यातः द्विगुणितः अभवत्, तथा च सर्वकारेण कृषि-पद्धत्यां आधुनिकीकरणाय नैके उपायाः कृताः सन्ति। सः अवदत् यत्, कृषकाः किसान्-क्रेडिट्-कार्ड् इत्यनेन माध्यमेन दश लक्ष-कोटिरूप्यकाणां लाभान् प्राप्तवन्तः।

प्रधानमन्त्री सूचितवान् यत् देशस्य यूनः अधुना कृषिकार्यं आधुनिक, व्यापकावसर-रूपेण पश्यन्ति । सः अवधानं दत्तवान् यत् विकसितभारतस्य कृते भविष्यकालिककृषि-व्यवस्थायाः निर्माणाय समन्वितप्रयासानां आवश्यकता वर्तते इति।

केन्द्रीय-सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः उक्तवान् यत्, तमिलनाडुराज्यस्य द्वाविंशतिलक्षं यावत् कृषकाः पी. एम्. किसान् सम्मान् निधि-योजनया लाभं प्राप्तवन्तः। कार्यक्रमस्य समये प्रधानमन्त्रिणा कृषकाभिः सह संवादः अपि साधितः।

---------------------------------------

<u>प्रधानमन्त्री- सत्यसाईं</u>

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् सर्वकारेण चतुर्दशाधिक द्विसहस्रतमे वर्षे पञ्चविंशति कोटिजनानां सामाजिकसुरक्षाव्यवस्था अधुना प्रायः शतकोटिजनानां कृते विस्तृता। आन्ध्रप्रदेशस्य पुट्टपर्थी-नगरे भगवतः श्री सत्यसाईं बाबा-वर्यस्य शतवार्षिक-जन्मोत्सवे भागम् अगृह्णन् जनसमूहं सम्बोधयन् प्रधानमन्त्री, स्थानीयस्तरे निर्मितानां उत्पादानां क्रयणेन, स्थानीय-अर्थव्यवस्थां सुदृढं कृत्वा, वोकल्-फ़ार्-लोकल् इति उपक्रमस्य समर्थनाय जनान् आवाहयत्।

प्रधानमंत्रीः अवदत् यत्, सम्पूर्णे देशे, अधुना पर्यन्तं प्रायः चतस्रः कोट्यधिकाः एतादृशाः बैंक लेखाः उद्घाटिता: सन्ति, यासु प्रायः पञ्चदशमलवोत्तर त्रीणि लक्ष कोटिरूप्यकाणि सञ्चिताः सन्ति, यत् बालिकाभ्यः वर्धमान-वित्तीय-सुरक्षां प्रतिबिम्बयति। सः अवोचत् यत् यद्यपि श्रीसत्यसाईं बाबा भौतिकरूपेण उपस्थितः नास्ति तथापि तस्य प्रेमस्य, सेवायाः, विश्वभ्रातृत्वस्य च शाश्वतसिद्धान्ताः सम्पूर्णे विश्वे कोटिशः जनानां निरन्तरं मार्गदर्शनं कुर्वन्ति।

शतवार्षिकोत्सवे, सः भगवतः श्रीसत्यसायि बाबा वर्यस्य जीवनस्य, उपदेशस्य, चिरस्थायीपरम्परायाः च सम्माने शतरुप्यकैः मुद्रा पैष्यचिटीकायाः च विमोचनं मुख्यमन्त्रिणा एन. चन्द्रबाबु नायडु वर्येण सह कृतवान्। पूर्वदिने प्रधानमन्त्रिणा प्रशान्ति निलयम् इत्यस्मिन् महा-समाधौ विशेषार्चना कृता।

------------------------------------------

## बिहार्- एन्. डी. ए.

बिहार्-राज्ये जनता-दल-(युनाईटेड) दलस्य प्रमुखः तथा राज्यस्य दीर्घकालं यावत् मुख्यमन्त्रीषु अन्यतमः नितीश-कुमारः अद्य राज्ये राष्ट्रिय-जनतांत्रिक-गठबन्धनस्य (एन्. डी. ए.) पक्षस्य विधायक-दलस्य नेता निर्वाचितः। पटना-नगरे घटबन्धनस्य घटकदलानां संयुक्तसभायां अयं निर्णयः स्वीकृतः। सद्य एव आयोजिते राज्यविधानसभानिर्वाचने एन्. डी. ए. पक्षेण त्रिचत्वारिंशोत्तर द्विशतं यावत् सदस्यात्मिकायां बिहारविधानसभायां द्वयाधिक द्विशतासनानि प्राप्य पुनः अधिकारः अधिगतम्। भाजपेति दलस्य नेता साम्राट् चौधरी पक्ष-विधानमण्डलस्य नेता निर्वाचितः, विजयसिन्हा उपनेता निर्वाचितः। एन्. डी. ए- पक्षस्य उपवेशनानन्तरं मुख्यमन्त्री नितीशकुमारः राज्यपालाय स्व त्यागपत्रं प्रदत्तवान्, नूतनसर्वकारं निर्माणाय प्रस्तावोपि प्रदत्तवान्। जनतादल (यूनाईटेड) दलस्य नेता नितीशकुमारः श्वः दशंवारं बिहारस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं करिष्यति। शपथग्रहण-समारोहः पटना-नगरस्य ऐतिहासिके गान्धी-मैदान-क्षेत्रे भविष्यति। अस्मिन् कार्यक्रमे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह अन्येपि जनाः उपस्थिताः भविष्यन्ति।

------------------------------------------

## राष्ट्रपतिः डिजिटल् इण्डिया

राष्ट्रपतिः द्रौपदी मुर्मुः वर्या अद्य प्रोक्तवती यत् डिजिटल् इण्डिया इति एकं परिवर्तनशीलम् उपक्रमः अस्ति येन प्रौद्योगिकीं नागरिकानां समीपे आनीय विभिन्नावसराणां द्वाराणि उद्घाटितानि। नवदिल्ल्यां राष्ट्रिय-प्रौद्योगिकी-संस्थानस्य पञ्चमं वार्षिक-दीक्षान्त-समारोहं सम्बोधयन् सा अवदत् यत् समान-अवसराः प्रदानाय द्रुत-अन्तर्जाल-सेवा, नवीनतम-प्रौद्योगिकी च दूरस्थेषु क्षेत्रेषु संस्थापिताः सन्ति। सा अवोचत् यत् एन्. आई. टि. सदृशाः संस्थाः माडेल्-डिजिटल्-ग्रामाणां निर्माणे महत्त्वपूर्णां भूमिकां निर्वहितुं शक्नुवन्ति, अपि च छात्रान् नूतनदिशि चिन्तयितुं प्रयतयितुं च प्रोक्तवती।

------------------------------------------

## नगरिका: मुक्तपत्रम्

न्यायाधीशाः सेवानिवृत्ताः कर्मचारिणः च मिलित्वा प्रख्यात-नागरिकैः सह काङ्ग्रेस्-दलस्य, लोकसभायां विपक्षस्य नेतारं राहुलगान्धिनं निन्दयन्तः, भारतस्य निर्वाचन-आयोगादीनां संवैधानिक-संस्थानां निन्दायाः कृतप्रयासानां कृते, मुक्तपत्रम् लिखितवन्तः। अस्मिन् पत्रे द्विषष्ट्यधिकैकशतं यावत् प्रमुखाः नागरिकाः हस्ताक्षराणि कृतवन्तः, येषु षोडश-न्यायाधीशाः, त्र्योविंशत्यधिकैकशतं यावत् सेवानिवृत्ताः कर्मचारिणः, चतुर्दश राजदूताः, त्रयस्त्रिंशदधिकैकशतं यावत् निवृत्ताः सशस्त्रसेनाधिकारिणः च सन्ति। पत्रे ते अधोरेखितवन्तः यत् देशस्य नागरिकाः निर्वाचन-आयोगेन सह दृढतया तिष्ठन्तु इति। ते प्रोक्तवन्तः यत् , समाजः याचितुम् अर्हति यत् राजनैतिकजनाः महत्त्वपूर्णसंस्थायां आरोप प्रत्यारोपणं स्थगयन्तु इति।

।। इति वार्ताः ।।